Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 1 | ISSN : 2582-0095

# अथर्ववेदाङ्गज्यौतिषे मुहूर्त्तविचार :

प्रो. प्रभातकुमारमहापात्र:
आचार्य:, विभागाध्यक्षश्च, ज्योतिषविभाग:, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसर:, जम्मू

अस्मिन् जगति जीवनस्य प्रतिपदं अग्रे सारयतुमुपकारकं वैदिकवाङ्मयम् । यत : वेद : अनन्तज्ञानराशि : , सकलकार्याणां सकलधर्माणाञ्च मूलम् । वेदोऽखिलं धर्ममूलम् इति मनुवचनं तत्र प्रमाणम् । असारे खलु संसारे यद् तत् सर्वं अभूत्, भवति ,भविष्यति च तस्याधार : वेद : । यत : भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति इति मनोर्वचनमेवात्र प्रमाणम् । तस्मात् त्रैकालिकसंयोजको अनन्तज्ञानमयो वेद : भारतीयानां आदर्शरूपो पथप्रदर्शक : ।

भारतीयज्योतिर्विज्ञानस्य मूलतत्त्वं वेदाङ्ग ज्योतिषे सन्निहितम् । तत्र प्रबन्धस्यास्य पर्यालोचनावसरे सर्वादौ तस्य अथर्ववेदाङ्गज्योतिषस्य सन्निहिततत्त्वानां मूल्याङ्कनावसरे एते प्रश्ना : उदीयमाना : दृश्यन्ते । किं वेदाङ्गम् ? किं च ज्योतिषम् ? तच्च कथमथर्ववेदाङ्गरूपेण पृथगालोच्यमानञ्चेति ? एवं जायमानायां विचिकित्सायां स्पष्टीक्रियते यत् –

**शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिम्**

**छन्दसा लक्षणाश्चैव षडङ्गो वेद उच्यते ।।**

एतस्मादेव वेदस्य षडङ्गानि परिज्ञायते । तत्र किं नाम ज्योतिषमिति प्रश्नस्योत्तरेण कथ्यते – 9ज्योतीषां सूर्यादि ग्रहाणां कालबोधकं शास्त्रम् अधिकृत्य इदं शास्त्रम्" ज्योतिषम् इति व्युत्पत्तिगतत्त्वात् सिद्ध्यति । परन्तु वैदिकपुरुषस्य शिक्षाकल्पादिषु षडङ्गेषु ज्योतिषं चक्षुरूपेण प्रतिभाति । तत्रोच्यते –

**वेदस्य चक्षुकिल शास्त्रमेतद्**

**प्रधानताङ्गे तु ततोऽस्य जाता ।**

**अङ्गैर्युतोऽन्यैर्परिपूर्णमिति**

**चक्षुर्विहीनो पुरुषो न किञ्चित् ।**

अनेन ज्ञायते वेदेन विना चक्षुर्विहीनपुरुषवत् न केवलं वैदिककार्यं अपि तु संसारे न किमपि कार्यं सम्भवति । उक्तञ्च नारदेन –

**सिद्धान्तसंहिता होरारूपं स्कन्धत्रयात्मकम् ।**

**वेदस्य निर्मलं चक्षु : ज्योतिश्शास्त्रमकल्मषम् ।।**

अतस्तत्र वेदाङ्गत्वेन स्कन्धत्रयात्मकमिदं शास्त्रं वेदाङ्गज्योतिषमिति नाम्ना प्रसिद्धम् ।

Accepted : 10 Jan 2020 | Published : 20 Feb 2020 | January-February-2020 [ 2 (1) : 157-161]

सचराचरेऽस्मिन् संसारे सर्वाणि कार्याणि कालमाश्रित्य सम्पद्यन्ते । प्राचीनकालादारभ्य इदानीं यावत् ( अत्यन्ताधुनिककालपर्यन्तं) घटीयन्त्रेण विना आकाशस्थानां ग्रहोपग्रहनक्षत्राणां गतेः विस्तृतं ज्ञानमस्माभिः वेदाङ्गज्योतिषेण प्राप्यते । तदुक्तं भास्कराचार्येण —

**वेदास्तावद् यज्ञकर्मप्रवृत्ताः, यज्ञा प्रोक्तास्ते तु कालाश्रयेण ।**

**शास्त्रादस्मात् कालवेधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।इति।**

एवमेव पर्यालोचनेन वेदपुरुषस्याङ्गत्वात् वेदाङ्गज्योतिषमेकं परमं पवित्रं शास्त्रमिति शास्त्रविदैः अङ्गीक्रियते । वेदोत्तरकाले शिक्षा-कल्प-व्याकरणादीनि" यानि षडङ्गानि इति प्रथितानि तेषां सर्वेषां वेदानां पृथक्तया षडङ्गानि आलोचितानि । तेषु आलोचितेषु षडङ्गेषु वेदाङ्गज्योतिषमन्यतममिति प्रतिभाति । वेदाङ्गज्योतिषं प्रथमतः ॠग्ज्योतिषमिति याजुषज्योतिषमिति द्विविधम् । परन्तु श्लोकेषु तत्क्रमे च साम्यत्वात् एकत्वं भजते । तस्य प्रणेता लगधमुनिः " कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः इत्युक्तिरेव तत्र प्रमाणम् । सामवेदस्य पृथक्तया वेदाङ्गज्योतिषं कुत्रचिदपि नोपलभ्यते । यद्यपि आर्चयाजुषयोः वेदाङ्गज्योतिषं एकमेव इति श्रीशेषकृतं यजुर्वेदाङ्गभाष्यं समाप्तम्' इति वाक्येन तद्व्यतिरिक्तं यजुर्वेदाङ्ग ज्योतिषं स्वतन्त्रं किमप्यस्तीति ज्ञायते । ९ एतद्भिन्नं तृतीयवेदाङ्गज्योतिषं अथर्ववेदाङ्गज्योतिषमिति निगद्यते । तत्र द्विषष्ठ्युत्तरशतसंख्याकाः श्लोकाः (१६२ श्लोकाः) सन्ति ।। किन्तु दतियापीताम्बरपीठद्वारा प्रकाशिते पुस्तके षट्षष्ठ्युत्तरशतसंख्याकाःश्लोकाः (१६६ श्लोकाः) सन्तीति प्रतिपादितम् ।

अथर्ववेदाङ्गज्योतिषे चतुदर्श प्रकरणानि विद्यन्ते । तत्र पितामहकाश्यपस्य संवादात्मकविषयः उपवर्ण्यते । काश्यपाय पितामहस्य उपदेशस्तु अत्र प्रस्तूयते । अथर्ववेदाङ्गसंहितायां एकोनविंशतितमे खण्डे कालतत्त्वं नवग्रहाणामुपयोगश्च विस्तृतरूपेण प्रतिपादितः । शङ्करबालकृष्णदीक्षितमहोदयस्य भारतीयज्योतिष नामके ग्रन्थे अथर्ववेदाङ्गज्योतिषस्य केचन अंशाः प्रतिपादिताः । तत्र वर्णितेषु प्रकरणेषु मुहूर्त्तप्रकरणं गुरुत्वपूर्णं स्थानं भजते । परवर्तिकाले मुहूर्त्तविषयमाधारीकृत्य, मुहुर्त्ततत्त्वम्, मुहूर्त्तमार्त्तण्डः, मुहूर्त्तचिन्तामणिः , मुहूर्त्तचूडामणिः, मुहूर्त्तकल्पद्रुमः, मुहूर्त्तमालादयः बहवः ग्रन्थाः विरचिताः । मुहूर्त्तं विना कालपरिमाणनिर्णयः असम्भवः स्यात् । तथा च दिवसरजनीदिनदण्डमासवर्षाणां स्पष्टतया परिगणनार्थं मुहूर्त्तविचारः अनिवार्येति कृत्वा अथर्ववेदाङ्गज्योतिषे ''मुहूर्त्तविचारः'' गुरुत्वपूर्णं प्रमुखं च स्थानं भजते ।

**मुहूर्त्तस्य स्वरूपम्**

तत्र काश्यप - प्रजापत्योः संवादरूपेण कालपरिमाणनिर्णयः, मुहूर्त्तविवरणं च विशदीक्रियते यथा-

**''अथ ब्रह्माणं स्वयंभुवं गुरुं लोकपितामहम् ।**

**ब्रह्मलोके सुखासीनं काश्यपः परिपृच्छति ।। (अ०वे०ज्यो० १ )**

उपरिलिखिते श्लोके काश्यपः मुहूर्त्तविषये प्रजापतिं यद् पृच्छति तत्समाधानमत्र उपस्थाप्यते-

**हे पितामह !**

**किं प्रमाणं मुहूर्त्तानां रात्रौ वा यदि वा दिवा ।**

**चन्द्रादित्यगतं सर्वं तन्मे प्रब्रूहि पृच्छतः ।। (अ०वे०ज्यो० २ )**

अत्र 'रात्रौ वा दिवसे वा चन्द्रसूर्याभ्यां सम्बन्धस्य सूर्यस्य किं प्रमाणं वरीवर्त्तते'' इति पृष्ठे समादधति --

**तस्य शुश्रुमाणस्य काश्यपस्य महात्मन : ।**

**प्रोवाच भगवान् सर्वं मुहूर्त्तज्ञानमुत्तमम् ।। (अ०वे०ज्यो० ३ )**

एवमेव प्रश्नकर्त्तारं काश्यपं सानुनयं दृष्ट्वा प्रजापति : श्रेष्ठमुहूर्त्तमाह —

**द्वादशाक्षि निमेषस्तु लवो नामाभिधीयते ।।**

**लवस्त्रिंशत् कला ज्ञेया कला त्रिंशत्त्रुटिर्भवेत् ।।**

**(अ०वे०ज्यो० ४)**

तैतिरीयब्राह्मणेऽपि दिवारात्र्यो : द्वयो : परिगणनेन मुहूर्त्तं कथ्यते ।। यथा चोक्तम् -

''अथ यदाह । चित्र :केतुर्दाता प्रदाता सविता प्रसविता अभिशास्तानुमन्तेति । एष एव तत् । एष ह्येव तेह्नो मुहूर्त्ता : । एष रात्रे : ।।'' (तै.ब्रा.३/२०/१) इति ।

सूर्यसिद्धान्तदृष्ट्या तु एतद्भिन्नतया प्रतिपाद्यते । तत्र '' सूच्याभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते '' इति वर्णितं दृश्यते ।

**मुहूर्त्तानां प्रकारभेदा : -**

अथर्ववेदाङ्गज्योतिषानुसारं पञ्चदशमुहूर्त्ता : परिगण्यन्ते । यथा रौद्र :, श्वेत :, मैत्र :, सारभट्ट :, सावित्र :, वैराज : विश्वावसु :, अभिजिद्, रोहण :, बल, विजय, नैऋत, बारुण, सौम्य, भगाश्वेति ।।

तैत्तिरीयब्रह्मणानुसारेणापि मुहूर्त्तानां पञ्चदशभेदत्वं स्वक्रियते । उक्तंपूर्वञ्च ''अथ यदाह । चित्र :केतुर्दाता प्रदाता सविता प्रसविता अभिशास्तानुमन्तेति । एष एव तत् । एष ह्येव तेह्नो मुहूर्त्ता : । एष रात्रे : ।।'' (तै.ब्रा.३/२०/१) इति एतद्व्यतिरिक्तं प्रत्येकस्मिन् मुहूर्त्ते पञ्चदश सूक्ष्ममुहूर्त्ता : स्वीक्रियन्ते तैत्तिरीयब्राह्मणे ।। तद्यथा उच्यते-

''अथ यदाह । इदानीं तदानीमिति । एष एव तत् । एषह्येव ते मुहूर्त्तानां महूर्त्ता : ।।'' इति । (तै.ब्रा. ३/१०/९/१)

**मुहूर्त्तस्यगणना :-**

अथर्ववेदाङ्गज्योतिषानुसारं ये ये पञ्चदशमुहूर्त्ता : वर्णिता : । तेषां ''द्वादशाक्षिनिमेषस्तु लवो.... त्रुटिर्भवेत् ।। इति कारिकानुसारं गणना स्पष्टीचकार । अत्र द्वादशवारं नेत्रपक्षपात : लव : । त्रिंशत् लवानां समाहार : । (३० ङ १२८ ३६० नेत्रपक्ष्मपाता :) एका कला । त्रिंशत् कलाभिश्च एका त्रुटि : परिगणिता । त्रिंशत् त्रुटीनां समाहारेण एक :मुहूर्त : सम्भवति । त्रिंशत् मुहूर्त्तानां समाहारेण अहोरात्रमेकं परिगण्यते ।।

तथाहि द्वादशाङ्गुलशङ्को : छायाद्वारा मुहूर्त्तानां भिन्नाभिन्नावधि : प्रमाणीक्रियते । यथा-

| **मुहूर्त :** | **छायाङ्गु लानि** | **मुहूर्त्त :** | **छायाङ्गुलानि** |
|---|---|---|---|
| १- रौद्र : | ९६ परम | ५- सावित्र : | ५ |
| २- श्वेत : | ६० परम | ६- वैराज : | ४ |
| ३- मैत्र : | १२ परम | ७- विश्वावसु : | ३ |
| ४- सारभट्ट : | ६ परम | ८- अभिजित् | |

प्रोक्तगणनानुसारं यत्र छाया स्थिरा भवति । तत्रैव अभिजितमुहूर्त्त : कथ्यते । उक्तं च -

''**यस्मिंश्छाया प्रतिष्ठिता**'' इति ।

मध्याह्नकालात् परं मुहूर्त्तानां छायाङ्गुलानि विपरीतक्रमेण परिगण्यन्ते । मध्याह्नछाया अङ्गुलत्रयत : किञ्चित् न्यूनी भवति । छायाद्वारा स्थलज्ञानं कर्त्तुं शक्यते । परन्तु सूर्यसिद्धान्ते छायानिमित्तं सर्वत्र द्वादशाङ्गुलशङ्कु : स्वीक्रियते । अत : तत्र सङ्गति : न दृश्यते इति । पञ्चमश्लोके वर्त्तते यथा –

**त्रुटीनां तु भवेत्रिशन्मुहूर्त्तस्य प्रयोजनम् ।।**

**द्वादशाङ्गुलमुच्छेषं तस्य छाया प्रमाणत : ।।** (अ०वे०ज्यो० ५ )

**मुहूर्त्तगणनाया : आवश्यकता**

मानवजीवने यथा समयस्य प्रत्येकांशं अमूल्यं भवति तथा तस्य समयस्य यथार्थतां यथाकालं यथादेशं यथापात्रं च निर्णयं करोति मुहूर्त्त : । मुहूर्त्तगणनाद्वारा कदा कीदृशं कार्यं सहजं सुकरं सम्भवं च भवति । तदेव परिनिर्दिष्टं भवति । कस्मिन् मुहूर्त्ते कीदृशं कर्म विधेयम् । कस्मिन् मुहूर्त्ते युद्धे शत्रु : पराजित : भवेत् । कदा च कार्यारम्भार्थं शुभकाल :, संस्थापनं , विसर्जनं, वाणिज्यारम्भ :, विद्यारम्भ :, गृहारम्भ : विवाह-होम-यज्ञकर्मारम्भादि सकलकार्याणां शुभाशुभसमयनिर्धारणार्थं मुहूर्त्त : निर्दिष्टो भवेत् ।

**मुहूर्त्तविचारस्य फलम्**

अथर्ववेदाङ्गज्योतिषे प्रसङ्गेऽस्मिन् या गणना क्रियते तत्र प्रत्येकमुहूर्त्तानुसारं पृथक्तया फलं फलति । तत्र सर्वादौ रौद्रमुहूर्त्तस्य फलस्य किं वैशिष्ट्यं वर्त्तते । तदेव प्रतिपाद्यते -

**''रौद्रे रौद्राणि कुर्वीत रुद्रकार्याणि नित्यश : ।**

**यच्च रौद्रं भवेत् किञ्चित् सर्वमेतेन कारयेत् ।।'' ।। इति ।।**

(अथर्व. वे. ज्यो. श्लो.१३)

अत्रेदं कथ्यते मारणादिप्रयोग : रौद्रनामके मुहूर्त्ते कर्त्तव्य : ।। यतोहि सर्वविधभयावहकार्याणां सिद्धि : रौद्रनामके मुहूर्त्ते सम्भवति । श्वेतनामके मुहूर्त्ते नवीनवस्त्रधारणं कर्त्तव्यम् , ग्रामनिर्माणं , उद्याननिर्माणं , कृषिकार्यञ्च कर्त्तव्यम् । यदा च सामञ्जस्यपूर्णस्य मित्रादिसम्बन्धे किमपि कार्यं करणीयं तदा मैत्रनामके मुहूर्त्ते कर्त्तव्यम् । कस्यचित् मित्रस्य शत्रो : नाश : कर्तव्यो भवेत् तदा सारभट्नामके मुहूर्त्ते कर्त्तव्यम् । सर्वविध यज्ञ-विवाह-चूड़ा-कर्मोपनयनादिसंस्कारा : सावित्रे मुहूर्त्ते करणीया : । कश्चित् राजपुरुषस्य प्रदर्शनमिच्छति तदर्थं वैराज नामक : मुहूर्त्तो वर्तते । अस्मिन्नेव वैराजनामके मुहूर्त्ते कवचधारणं, वस्त्रादिदानं, शास्त्रादिनिर्माणञ्च कर्त्तव्यम् । विश्वावसुनामके मुहूर्त्ते सर्वविधकार्यार्थसिध्यर्थं एवं स्वाध्यायार्थं च सर्वमपि कर्म कर्त्तुं शक्यते । तत्र च परस्परं वैमनस्यं यदि भवेत् कदा वा सामञ्जस्यं स्थपनियमिति विचार : अभिजिद् नामके मुहूर्त्ते विहितो वर्त्तते । कथ्यते अत्र यत् वृक्ष बिल्व-गुल्म - लतानां रोपणं यदि रोहण नामके मुहूर्त्ते क्रियते तदा ते वृक्षा : अरोगा : पुष्पवन्त : फलवन्तश्च भवन्ति । बलनामकस्य मुहूर्त्तविशेषस्य विषये वर्णनं प्राप्यते यत् ''बलेन तु बलं राजा स्वयमारूह्य योजयेत् ।।'' अस्मिन् मुहूर्त्ते यदि राजा शत्रुराज्ये आक्रमणं करोति तदा अवश्यमेव विजयं प्राप्नोति । विजयमानके मुहूर्त्ते शत्रुराज्ये यदि राजा आक्रमणं करोति तदा अवश्यं शत्रौ विजयं प्राप्नोति । शान्तिस्वस्त्ययनादिमङ्गलपाठमपि एतस्मिन्नेव मुहूर्त्ते कर्त्तव्यम् । यदि नैरुत नामके मुहूर्त्ते शत्रो : राष्ट्रे आक्रमणं क्रियते तदा समग्रमपि सन्यबलं नाशं उपयाति । वारुणनामके मुहूर्त्ते जलसम्बन्धीनि पदार्थानि यदि रोप्यन्ते तदा कृषकानां कृते साफल्यं

भवति । यानि कानिचिदपि शुभकार्याणि यदि सोम्यनामके मुहूर्ते क्रियन्ते तदा नूनं साफल्यं भवति । सर्वाषामपि स्त्रीणां विशेषत: कन्यकानां सौभाग्यसम्बन्धीनि कार्याणि यदि भगनामके मुहूर्त्ते क्रियते तदा शुभफलं प्राप्यते । सर्वेषां मुहूर्त्तानां यदा अध्ययनं क्रियते तदा ज्ञायते यत् मुहूर्त्तस्य नामानुसारमेव फलं भवति । यस्य मुहूर्त्तस्य य: शब्दार्थ: तद्विषयके तत्र साफल्यमिति ।

मुहूर्त्तविचारस्योपसंहार: - आधुनिकसमाजे दैनन्दिन जीवने सर्वे सुमुहूर्त्तस्य लाभं प्राप्न्यु: । इदनींतनकाले समग्रे विश्वे विभिन्नेषु स्थानेषु बहव: दुर्घटना: सम्भवन्ति । कुत्रचित् प्राणहानि:, अपघात:, कुत्रचित् विवाद: दृढीभूत: भवति, कुत्रचिदपि दैवीदुर्विपाकादय: भवन्ति । तत्र कारणं सुमुहूर्त्तस्य निर्णये निरूपणे वा वयमसमर्था: स्म: । तस्मात् दुर्घटनानां दूरीकरणार्थं सुमुहूर्त्तस्य निर्णय: करणीय: येन सर्वेषु जनेषु मुहूर्त्तानां विषये समादर: विवर्धेत अवश्यं सुफलं च मिलिष्यति ।

समग्रेविश्वे शन्तिकल्पतरु समारोपणाय , विश्वशान्ति स्थापनाय , विश्वबन्धुत्व प्रतिष्ठापनाय सांस्कृतिकैक्यसंस्थापनाय वैमनस्य निर्मूलनाय च उपकारभूताया: मुहूर्त्तगणनाया: आवश्यकता वर्तते । नूनमेवाचरणीया इयं मुहूर्त्त गणना इति शम् ।।

सन्दर्भ: ग्रन्थसूची-
1 - अथर्ववेदाङ्गज्योतिषम्
2 - सारावली - कल्याणवर्मा - मोतीलाल बनारसी दास:, दिल्ली
3 - बृहत्पाराशर-होराशास्त्रम् - पराशर: - चौखम्भासंस्कृतभवनम्-वाराणसी
4 - ज्योतिषरत्नाकर: - देवकीनन्दनसिंह: - मोतीलाल-बनारसीदास:, दिल्ली
5 - फलदिपीका - मन्त्रेश्वर: - व्याख्याकार: - पण्डित: गोपेशकुमारओझा - मोतिलालबनारसीदास: - दिल्ली
6 - बृहद्दैवज्ञरञ्जनम् - श्रीमद्रामदीनदैवज्ञ: - ॆयभाग: - मोतिलाल बनारसी दास - वाराणसी
7 - मुहूर्त्तचिन्तामणि: - अनन्तदैवज्ञ: - भारतीय विद्या प्रकाशन - वाराणसी
8 - मुहूर्त्तमार्तण्ड: - श्रीनारायणदैवज्ञ: - चौखम्भा संस्कृत संस्थान - वाराणसी
9 -फलितविकास - रामयत्न ओझा - चौखम्बा-सुरभारती-प्रकाशन - वाराणसी
10 - जातकपारिजात: - श्रीदैवज्ञवैद्यनाथ: - चौखम्भासंस्कृतसंथानम्, वाराणसी